# shrI shiva nIrAnjanam

# શ્રીશિવ નીરાંજનમ્

## Document Information

Text title : shiva nIrAjanam

File name : shivanIrAjana.itx

Category : AratI, shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : From shivananda site, possible he is the author

Latest update : October 30, 2008

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

shrI shiva nIrAnjanam

# શ્રીશિવ નીરાંજનમ્

હરિઃ ૐ નમોઽત્વનન્તાય સહસ્રમૂર્તયે સહસ્રપાદાક્ષિશિરોરુવાહવે ।
સહસ્રનામ્ને પુરુષાય શાશ્વતે સહસ્રકોટિયુગધારિણે નમઃ ॥ ૧॥

ૐ જય ગઙ્ગાધર હર શિવ, જય ગિરિજાધીશ શિવ, જય
ગૌરીનાથ ।
ત્વં માં પાલય નિત્યં, ત્વં માં પાલય શમ્ભો, કૃપયા જગદીશ ।
ૐ હર હર હર મહાદેવ ॥ ૨॥

કૈલાસે ગિરિશિખરે કલ્પદ્રુમવિપિને, શિવ કલ્પદ્રુમવિપિને
ગુઞ્જતિ મધુકર પુઞ્જે, ગુઞ્જતિ મધુકરપુઞ્જે ગહને ।
કોકિલઃ કૂજતિ ખેલતિ, હંસાવલિલલિતા રચયતિ
કલાકલાપં રચયતિ, કલાકલાપં નૃત્યતિ મુદસહિતા ।
ૐ હર હર હર મહાદેવ ॥ ૩॥

તસ્મિઁલ્લલિતસુદેશે શાલામણિરચિતા, શિવ શાલામપિરચિતા,
તન્મધ્યે હરનિકટે તન્મધ્યે હરનિકટે, ગૌરી મુદસહિતા ।
ક્રીડાં રચયતિ ભૂષાં રઞ્જિતનિજમીશમ્, શિવ રઞ્જિતનિજમીશં
ઇન્દ્રાદિકસુરસેવિત બ્રહ્માદિકસુરસેવિત, પ્રણમતિ તે શીર્ષમ્,
ૐ હર હર હર મહાદેવ ॥ ૪॥

વિબુધવધૂર્બહુ નૃત્યતિ હૃદયે મુદસહિતા, શિવ હૃદયે મુદસહિતા,
કિન્નરગાનં કુરુતે કિન્નરગાનં કુરુતે, સપ્તસ્વર સહિતા ।
ધિનકત થૈ થૈ ધિનકત મૃદઙ્ગં વાદયતે, શિવ
મૃદઙ્ગં વાદયતે,
ક્વણક્વપલલિતા વેણું મધુરં નાદયતે ।
ૐ હર હર હર મહાદેવ ॥ ૫॥

કણ કણ-ચરણે રચયતિ નૂપુરમુજ્વલિતં, શિવનૂપુરમુજ્વલિતં.
ચક્રાકારં ભ્રમયતિ ચક્રાકારં ભ્રમયતિ, કુરુતે તાં ધિકતામ્ ।

તાં તાં લુપ-ચુપ તાલં નાદયતે, શિવ તાલં નાદયતે,
અઙ્ગુષ્ઠાઙ્ગુલિનાદં અઙ્ગુષ્ઠાઙ્ગુલિનાદં લાસ્યકતાં કુરુતે ।
ૐ હર હર હર મહાદેવ ॥ ૬॥

કર્પુરદ્યુતિગૌરં પઞ્ચાનનસહિતમ્, શિવ પઞ્ચાનનસહિતં,
વિનયન શશધરમૌલે, વિનયન વિષધરમૌલે કણ્ઠયુતમ્ ।
સુન્દરજટાકલાપં પાવકયુત ફાલમ્, શિવ પાવકશશિફાલં,
ડમરુત્રિશૂલપિનાકં ડમરુત્રિશૂલપિનાકં કરધૃતનૃકપાલમ્ ।
ૐ હર હર હર મહાદેવ ॥ ૭॥

શઙ્ખનનાદં કૃત્વા ઝલ્લરિ નાદયતે, શિવ ઝલ્લરિ નાદયતે,
નીરાજયતે બ્રહ્મા, નીરાજયતે વિષ્ણુર્વેદ-ઋચં પઠતે ।
ઇતિ મૃદુચરણસરોજં હૃદિ કમલે ધૃત્વા, શિવ હૃદિ કમલે ધૃત્વા
અવલોકયતિ મહેશં, શિવલોકયતિ સુરેશં, ઈશં અભિનત્વા ।
ૐ હર હર મહાદેવ ॥ ૮॥

રુણ્ડૈ રચયતિ માલાં પન્નગમુપવીતં, શિવ પન્નગમુપવીતં,
વામવિભાગે ગિરિજા, વામવિભાગે ગૌરી, રૂપં અતિલલિતમ્ ।
સુન્દરસકલશરીરે કૃતભસ્માભરણં, શિવ કૃત ભસ્માભરણમ્,
ઇતિ વૃષભધ્વજરૂપં, હર-શિવ-શઙ્કર-રૂપં તાપત્રયહરણમ્ ।
ૐ હર હર હર મહાદેવ ॥ ૯॥

ધ્યાનં આરતિસમયે હૃદયે ઇતિ કૃત્વા, શિવ હૃદયે ઇતિ કૃત્વા,
રામં ત્રિજટાનાથં, શમ્ભું વિજટાનાથં ઈશં અભિનત્વા ।
સઙ્ગીતમેવં પ્રતિદિનપઠનં યઃ કુરુતે, શિવ પઠનં યઃ કુરુતે,
શિવસાયુજ્યં ગચ્છતિ, હરસાયુજ્યં ગચ્છતિ, ભક્ત્યા યઃ શ ૃણુતે ।
ૐ હર હર હર મહાદેવ ॥ ૧૦॥

ૐ જય ગઙ્ગાધર હર શિવ, જય ગિરિજાધીશ શિવ, જય
ગૌરીનાથ ।
ત્વં માં પાલય નિત્યં ત્વં માં પાલય શમ્ભો કૃપયા જગદીશ ।
ૐ હર હર હર મહાદેવ ॥ ૧૧॥

This can be sung in traditional Hindi Aratis, like OM jaya jagadIsha hare.
Encoded and proofread by Sunder Hattangadi

*shrI shiva nIrAnjanam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*